रलङ्कृतबहिःप्राकारं शिवसन्दर्शनायागतसुरासुरचक्रगतागतसंमर्दसंकुपित-तद्द्वारपालकरकमलविलसदमलवेत्रलताघातसुगममार्गं गोपुरद्वारं अति-चतुरगन्धर्वकुलवाद्यमानवीणावेणुमृदङ्गनिनादानुसरणशालिकिन्नरगीय-मानभद्रकरुद्रावतारचरितानुरूपहाव – भावदर्शनजाग्रद्भमराङ्गनानटन-सरम्भशब्दायमानभूषणध्वनिनिरन्तरितसभामण्टपं निश्चलावयवतया अभ्यस्यतेव योगं स्तब्धश्रवणयुगलतया शृण्वतेव किमप्यपूर्वाः शिवकथाः दृष्ट्या च द्रष्टव्यं सफलं भवत्विति मत्वैव लोचनयुग-लेन शिवं पश्यता अतिधवलसमुन्नततया कन्यास्नेहवशात् अयमागत्य तिष्ठति हिमवानिति शङ्कां वहता जनानां पाण्डरेण प्रभावितानेन वज्रमयेनेव स्थितेन वृषभेण मण्डितशिवसन्निधि सत्यलोकमुकुटायमा-नेन रत्नप्रभाभिरुद्भास्यमानदशदिशेन शिखरेण भूषितान्तरिक्षभागं अखिलचराचरप्रपञ्चवर्द्धमानेन जगज्जनन्या भगवत्या गौर्या पूजितेन गौरीश्वरनामकेन शिवलिङ्गेन सनाथीकृतगर्भगृहं श्रूयमाणसुवर्णमय-प्राकारभित्तिवलभीस्थितकपोतहुङ्कृतितया भर्त्सयदिव दूरादेव पात-कानि पातकिनां देवालयमद्राक्षीत् ॥

प्राकारेष्वपि गोपुरे च शिखरे जाज्वल्यमानार्चिषो
यस्मिन् भान्ति च हीरकेन्द्रमणयस्ते पद्मरागादयः ।
यत्कान्तीर्विविधा विलोक्य मनुते प्राणी परं मूढधीः
सूर्योऽयं किल शीतभानुरयमित्यृक्षाणि सन्ध्येति च ॥ ३ ॥

गत्वा स तत्र रुचिरे कृतमज्जनोऽथ
भस्मत्रिपुण्ड्ररुचिराभलविग्रहोऽयम् ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रुद्राक्षभूषणविधिर्नियमान्मुनीन्द्रो
देवं हि सेवितुमगात्तरुणेन्दुचूडम् ॥ ॥ ५ ॥

अथ च संपाद्य सामग्रीमासाद्य चानुज्ञां द्वारपालाभ्यामागत्य समस्तसुरासुरेन्द्रमुकुटतटीघटितमणिमयखराजिनीराजितमग्य भगवतो गौरीश्वरस्य समीपं निपद्य कोमलतरदर्भाङ्कुरकल्पिते परमासने स्मृत्वा च सन्निधिवर्तनमात्रेण कुर्वन्तमनुग्रहं सर्वात्मतया किमप्यनिच्छन्तमुदासीनतया तृणमिव सर्वमालोकयन्तं निरन्तरचिदैकमग्नतया जडमिवोन्मत्तमिव दीनमिव बालमिव शिवनामानं महान्तं पुरुषं श्रीसद्गुरुमनुसन्धाय तत्र शाणनिघृष्टवज्रफलके दिव्यपीठे स्थिते पारमेश्वरलिङ्गे उद्यत्सुधांशुसहस्रदीधितिं अम्बिकाश्लिष्टवामभागं भगवन्तं मदनान्तकं अभिषिच्य चन्द्रकान्तदृषन्निःसृतनिर्झरसंयोगादधिकशीतलैः सुरसरिज्जलैः अभिसंवेष्टय अतिकोमलेन सुगन्धिना परिजाततरुवल्कलेन अलङ्कृत्य हिमपाण्डरेण भस्मना नवरत्नमणिमिश्रितरुद्राक्षमालिकाभिश्च त्रिकसदमरतटिनीजातकुमुदनालबिसतन्तुमयेनेव शुचिना यज्ञोपवीतेन च आलिप्य हरिणाङ्कहरिणमदपङ्किलेन चन्दनेन अभ्यर्च्य कोमलैर्बिल्वपत्रैः आराध्यागरुप्रभवेण धूपेन स्वभावप्रसृमरज्योतिषा रत्नदीपेन च निवेद्य धिःकृतामृतरसानि कन्दमूलानि प्रदक्षिणीकृत्य प्रणिपत्य प्रसाद्य पुष्पाञ्जलिभिः यथामति स्तोतुमारभत ॥

जय जय भगवन्
भवानीपते, भूतनाथाव मां काल–
कालाशु बालाब्जमौले मृगालाक्ष,
हालाहलालङ्कृत, व्यालमाल, स्फुर-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्कान्तिजाल, त्रिशूलायुध, श्री-
गदिक्पालवन्द्यानुकम्पालवाल,
प्रभो, तालनाट्यप्रवीण अलसं देवशम्भो ! सदा ।
स्मरहर हर दुःखं मे,
तन्न जानासि किं, यद्वासनाख्या पिशाची
वशीकृत्य सर्वेन्द्रियैर्मानसं मे
गृहीत्वा बलाद्धावतीतस्ततोऽपि क्व यामि,
कस्मै वदामीश किंवा च कुर्वे
कथं धारयामि त्वमेनां महादेव
बद्ध्वा दृढं भक्तिरज्ज्वा पिशाचाधि-
नाथोऽसि ते पादपद्मार्चनायां नियुक्तां कुरु ।
निरवधिकरुणाकर,
अन्या गति र्नैव सत्यं भावनेव दाता
पिता चापि माता सुहृत् रक्षिता
बन्धुवर्गो गुरुश्चापि कस्मादुपेक्षां
करोषि प्रभो तान्तमेतं नितान्तम्
कृतान्तान्तकाशान्तचित्तं च मां तात-
वद्रक्ष कान्तां तनौ विभ्रदागत्य
अशान्तैकबन्धो पतन्तं च
संसारसिन्धौ समुद्धारय श्रीमहादेव भोः !
परशिव किमहं-
ब्रुवेऽभीष्टदानैकदक्षे त्वयीशे
जयत्येव मे दुर्दशेयं किमेनं
न जानासि किं वा विदित्वाऽप्युदासीन

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एत्रासि किं वा, दया मन्निमित्ता
कथं नोरुणद्धीश हा हा महापातकं
यद्वलीयो महद्भो महान्तं
महादेवमम्बापतिं चापि दुःखादवोचम् ॥

न कार्यश्च कोपो भवानेव सेव्यो
भवानर्चनीयो भवान् प्रार्थनीयः ।
भवन्तं विनाऽन्या गतिर्नैव सत्यं
प्रसीद क्षमस्व प्रभो पाहि माम् त्वम् ॥ इति ॥ ५ ॥

अथ तमात्मनि ध्यात्वा निवेदितेन कन्दमूलेनाहारमकरोत् ॥ एवं त्रिभ्रम् ॥

कालत्रयं प्रतिदिनं भजतो हि तस्य
गौरीश्वरं ययुरहानि च सप्तसप्त ।
कृत्वा विधिं नियमतः स मुनिः परेद्युः
निद्रां चकार भगवानथ रात्रिभागे ॥ ॥ ६ ॥

ततश्च प्रत्युषसि सर्वशोभिमानरहितानन्दकरगोचिषा तृतीयलोचनेन चन्द्रकलया च युक्तः विषवहा जटाजूटेन कन्धरया च समलङ्कृतः अहि - साधिक्यं मनसा शिरसा च दधानः सर्वदानवसंसर्पदुज्ज्वलतेजसा त्रिशूलेन रुद्राक्षमणिमालिकया च अभिमण्डितः बहुशो भासुरपामरपावनकरचरितजुषा अम्बिकया भस्मत्रिपुण्ड्रेण च समन्वितः कामनाशकोऽपि कामपूरकः महेश्वरोऽपि स्वीकृतभिक्षाटनः निराकारोऽपि चराचरतनुः दोषाकरशेखरोऽपि अतिपावननामा भगवान् परमेश्वरः स्वप्ने आगत्य अधिकतया

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हृदयमभिव्याप्य बहिर्निर्गच्छता हर्षेणेव रोमाञ्चप्रपञ्चेन अमलतरपदकमलधावनाय स्वयमागच्छतेव शुचिना आनन्दजलपूरेण वाङ्मनोऽतीतं स्तोतुं लज्जयेव मन्दमन्दं प्रवर्तमानया सगद्गदया वाण्या च प्रकाशीभवद्भक्ति स्तुवन्तं अत्यद्भुतसन्दर्शनहर्षातिरेकादवलुप्तकर्तव्यं आलोक्य मृकण्डुः अतिवत्सलतया संस्पृशन्नङ्गेषु पाणिना सुधावधीरिणीं वाणीमुवाच ॥

वत्स किमेवंविधं कृतवानसि साहसम् । यत्किल ॥

कृशो जातो देहः कठिनमनसस्तेऽनशनतो
विवर्णः क्लेशं च प्रकटयति बिल्वापचयतः ।
कठोरैश्शूकाग्रैः किणयुततले पाणिकमले
महात्मन् चर्मेदं रविकिरणतप्तं समभवत् ॥ ॥ ७ ॥

त्वं भक्तोऽसि चराचरात्मकतनोर्मूर्तिः परा चासि मे
त्वं प्रेमास्पदमस्यृषीन्द्र च भवानानन्दहेतुश्च मे ।
यद्यद्वाञ्छसि तत्तदेवमखिलं दत्तं हि तुभ्यं मया
किं वान्यद्बहुना त्वया सुकृतया क्रीतोऽस्म्यहं पूजया ॥ ८ ॥

इत्थमभङ्गुरदयारसवर्षिणीं आकर्ण्य वाणीं चन्द्रशेखरं प्रत्यवादीत् ॥

भगवन् परमेश्वर, किं भाषसे ॥ महतां खलु स्वभावसिद्धेयं रीतिः यदतिनीचानपि महत इव प्रदर्शयन्ति वात्सल्येन, त्वं तु महद्भ्योऽपि महीयान् ॥ पश्य ॥

क्वाहं मूढः क्व तव महिमा वेदशास्त्रैरगम्यः
क्वाहं जीवो जननमरणक्लेशयुक्तो महेश ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

क्व त्वं देवो जनिमृतिजराक्लेशपाशैर्न युक्तः
स्वामिन् शम्भो गिरिश शिव मे त्वं क्षमस्वापराधान् ॥
॥ ९ ॥

अपि च ॥

त्वं निर्गुणोऽपि गुणवत्यमलो मलेन
युक्ते विनाशरहितः सविनाशकेऽस्मिन् ।
देवो महानपि च नीचतरे मयीश
स्वामिन् प्रसादमकरोस्तदहं हि धन्यः ॥ ॥ १० ॥

अस्मादपि च किं प्रार्थनीयम् ॥

वेदान्तश्रवणस्य यच्च तपसां ध्यानस्य यत्कर्मणां
सेवायाश्च गुरोः सतां च भजनस्यातिथ्यधर्मस्य च ।
यत्प्रोक्तं फलरूपमित्यभयदं स्वामिन् महादेव तत्
जातं मे शिव दर्शनं हि भगवन् साफल्यमासीज्जनेः ॥११॥

इत्यावेदयन्तं तद्भक्तिदृढतानिरीक्षणेन समुपजाताधिकप्रीतौ प्रहस्य पार्वतीरमणे वत्स भक्तवर्य मत्प्रसादात् निर्भयो भव सर्वतः स्मरणमात्रेणाविर्भवामीत्युक्त्वा तिरोहिते भगवति नमज्जनशङ्करे शङ्करे तरुशिखरनिलीनानां सुप्तोत्थितानां पक्षिणां प्रबुद्धः कोलाहलेन सूर्योदये निवेद्य गुरवे वृत्तान्तमिमं अवाप्य तदनुज्ञां कृताह्निककृत्यः पत्न्या सह मुनिवरः स्वमाश्रमपदमाजगाम ॥

इति श्रीविरूपाक्षविरचिते शिवविलासाख्ये चम्पूकाव्ये
द्वितीयोल्लासः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्रीशिवाय नमः ॥

॥ अथ तृतीयोल्लासः ॥

अथ कदाचित् सकलतरुणजनलोचनानन्ददायिनी काशमानकाशपुष्पविमलसच्चामरा दूरीकृतसकलदुरवगाहधूमयोनिसमाना उपरिधार्यमाणनिर्मलातपत्रायमाणरजनीकरमण्डलाखण्डिताखिलमानिनीमानावलेपा सुखपालिताखिलहंसा सुसमुत्फुल्लपङ्कजसमुल्लसन्मकरन्दपानमत्तमधुकरझङ्कारमिषात् पुरतो गीयमानविरुदावली कमलिन्यास्समुल्लास शरत्समयलक्ष्मीः ।

यत्र हंसा विराजन्ते मुक्ताहारविभूषणाः ।
हासा इव सरोजिन्याः कुचा इव मृगीदृशाम् ॥ १ ॥

यत्र फुल्लानि कञ्जानि कम्पितानि च वायुना ।
नीवीमोक्षे प्रियं वध्वाः धारयन्तौ कराविव ॥ २ ॥

तस्यां समुल्लसन्त्यां च सुशीला पतिदेवता ।
गर्भं दधार देवीव निधिं भूमिः सुलक्षणा ॥ ३ ॥

ततः कतिचिद्गतेषु दिवसेषु समुद्यत्सुधाकरमण्डलकवलनं बबन्ध भावम् । विमलतरतरङ्गधौतप्रान्तसरोवरमञ्जुगुञ्जद्विराजमानराजहंसविलासासक्तं समभवन्मनः ॥

विकसितपुण्डरीकामोदे प्रीतिरभूत् ॥

अथ च क्रमेण इन्द्रनीलमणिखचिताग्रभागं शिखरयुगलमिव हिमवतः सभ्रमरमुखं पङ्कजकोशद्वन्द्वं अनो... ...स्तनयुगम् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वलित्रयी च गर्भे विद्यमाननिरवद्यमहापुरुषभयादिव मन्दमन्दमपायात् ।। मध्यभागोऽपि तस्या अपहाय कृशतां वर्द्धिष्णुगर्भस्पर्धयेव दिने दिने वृद्धिमाप । अभ्यन्तरविद्यमानदिवाकरविम्बामिव दिशमैन्द्रीं अन्तर्निहितप्रबोधामिवोपनिषदां आलोक्य ससत्वां पत्नीं आननन्द मुनिवरः ।। ततश्च ।।

सीमन्तादिक्रियाः सर्वास्तथा चक्रे महातपाः ।
तासु तुष्टो यथा जन्तुः स्वर्गं निन्द्यान्मुनीश्वरः ।। ४ ।।

अथ च दशमे मासि उदयकालोऽयं महात्मनोऽस्य तत्र युक्तः तूष्णीं भावोऽस्माकमितिमत्वैव पल्लवव्याजेन शिरसि सङ्घटिताञ्जलिषु सुप्तोत्थितपक्षिकोलाहलेन स्तुवत्स्विव भगवन्तमरविन्दबान्धवमाश्रमवृक्षेषु इतस्ततः श्रूयमाणसमदकपोतावलिहुङ्कृतिनया प्रसवाय कुन्थत्यामिव दिशि पौरुहूत्यां –

पुत्रं सा सुषुवे बाला दधानं भास्वरां प्रभाम् ।
ऐन्द्री दिगपि देवेशं पवित्रचरितं रविम् ।। ५ ।।

तदानीं च बभूव सर्वमपि शुभशंसि–

तथाहि:–

तदीयप्रभावितानेनैव हततिमिराः प्रसन्ना बभूवुर्दिशः । संरोद्धायं ममेति भीत्येव विकसितकमलसौरभोपहारमादाय मन्दमन्दमस्पन्दि गन्धवहेन । कुशलोभविष्यतानेन यागकर्मणि भविताऽधिकतृप्तिरस्माकमिति तोषादिव प्रदक्षिणाकारशिखैर्जज्वलिरे यज्व-

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पावकैः, सौकुमार्यातिशयान्निर्जिता शरणार्थमागतेवान्तरिक्षच्युता कुसुमपङ्क्तिरवलोकिता पावनभूभागेषु । दिव्यदुन्दुभयोऽपि तदीय-गम्भीरस्वरमभ्यस्यन्त इव स्वयमनाहताः विनेदुः ॥

पुरोधसा ब्राह्मणपुङ्गवेन
युतेन पित्रा कृतजातकर्मा ।
शुशोभ शाणादिकसंस्कृतोऽसौ
मणिर्यथात्यन्ततरां कुमारः ॥ ॥ ६ ॥

एकादशेऽहनि मुनिप्रवरोऽथ मार्क-
ण्डेयं तनूजमकरोद्भगवान् हि नाम्ना ।
आनन्दमापतुरगेन्द्रसुतामहेशौ-
यद्वद् गुहेन नितरां पितरौ सुतेन ॥ ॥ ७ ॥

आश्रमेषु करजानुना शिशुं
सञ्चरन्तमवलोक्य हर्षिता ।
क्रीडने रतमितस्ततस्ततो
रेणुयुक्तवदनं बभूव सा ॥ ॥ ८ ॥

मन्दमन्दमवलम्ब्य चाङ्गुली-
राश्रमेषु विचचार जनन्याः ।
तापसीजनसमीरितं वचो
व्याजहार मधुरं मुनिबालः ॥ ॥ ९ ॥

ततो विगतशैशवं समभिवीक्ष्य पुत्रं मुदा
पितोपनयनादिकं सकलमेव तस्याकरोत् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

समर्थयितुमादरान्मुनिरधीनमेवाञ्जसा
पुरोहिततपस्विनोरपि च वेदशास्त्रेषु तम् ॥ १० ॥

ततश्च मुखाद्गुरोर्मेधावाहुल्यात्प्रतिजग्राह समस्ता अपि विद्याः ॥

तथाहि–

वेत्ता वेदेषु, विद्वान् वेदान्ते शास्ता शास्त्रेषु, शिक्षिता शस्त्रे च, योग्यो योगे यागे च, विचक्षणो व्याकरणे, विज्ञातमर्मा धर्मेषु, प्रवीणो वीणासु वेणुषु च समर्थोऽखिलेषु स्वल्पेनैव कालेन समभवत् कुमारः ॥

अथ च ॥

अभ्यर्थितो गुरुरुवाच च दक्षिणार्थं
शिश्रूषयैव नितरां तव जाततोषः ।
इत्थं निशम्य वचनं ह्यभिवाद्य भक्त्या
तस्याज्ञयैव पितुराश्रममाजगाम ॥ ॥ ११ ॥

अथ क्रमेण प्राप्तयौवनः ॥

शुश्रूषां रचयन् सुमापहरणात् पादस्य संवाहनात्
श्रीमच्छङ्करपूजनोपकरणान्यादाय तद्दानतः ।
आज्ञायाः करणाच्च साध्ववनतः प्रीतिं समुत्पादयन्
पित्रोः श्रीशिवमर्चयन् मुनिसुतः सौख्यं समावाप सः ॥
॥ १२ ॥

इति श्रीविरूपाक्षविरचिते शिवविलासाख्ये चम्पूकाव्ये
तृतीयोल्लासः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्रीशिवाय नमः ॥

॥ अथ चतुर्थोल्लासः ॥

अथो मुनिसुतः साधुः श्लाघ्यमानगुणोदयः ।
उवास स तपोऽरण्ये दान्तैः शान्तैर्मुनीश्वरैः ॥ ॥ १ ॥

स किल ततः कस्मिंश्चिद्दिवसे –

दृष्ट्वा तां व्यसनातुरां स्वजननीं बालोऽपि धीरस्तथा
वाक्यं चैतदुवाच साम्बमनघं ध्यात्वा च तस्मिन् क्षणे ।
मातस्तेऽपकृतं नु केन नहि चेदाधिश्च किं वाथ वा
व्याधिर्वा वद लक्षयेऽत्रभवतीं शोकाग्निदग्धामिव ॥
॥ २ ॥

इति ॥

साप्येवं प्रत्यवादीदमुष्मै ॥

"वत्स, मम नैवास्त्याधिः, नापि शरीरे व्याधिः, केनापि मनसापि नापकृतं, तथापि बाधते मां शोकः तत्कारणं च श्रूयताम् ॥ पुरा, कश्चिदागत्य मत्सन्निधावेव तव पितरं (मृकण्डुम्) इत्थमुक्तवान् ॥

पुत्रस्ते भविता च सुन्दरतनुर्विद्यावतां शेखरः
श्रीमान् सद्गुणवान् प्रमोदजनकः पित्रोर्मुहुः केवलम् ॥
सोऽयं षोडशवार्षिको यदि तथा मृत्युर्हरिष्यत्यमुम् ।
दुःखं मा कुरु चेतसि त्वमवनीगीर्वाण हेशाङ्कर ॥
इति ॥ ३ ॥

ततोऽयम् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अभावं भजते भावस्तत्र का परिदेवना ।
मत्वेत्थं स मुनिः पुत्रन्ध्यायन्नास्ते परं शिवम् ॥ ४ ॥

मम तु वात्सल्यातिशयाच्छोकविकाराः सञ्जाताः किं च ॥

पुत्रः प्रेमपदं च जीवनमसौ पित्रोर्गतिः केवलं
वार्धक्ये खलु रक्षिता च यदयं लोके परस्मिन्नपि ।
पुन्नाम्नो नरकात्करोत्यपि च यस्त्राणं च तस्मात्सुतात्
किञ्चिन्नाप्यधिकं तु वस्तु किल भोः पश्यामि लोकत्रये ॥
॥ ५ ॥

अपि च ॥

उभयोरपि यत्प्रेम सुरते विद्यतेऽर्भक ।
मिलित्वा सकलं तद्धि सुतशब्देन शब्दितम् ॥ ॥ ६ ॥

तस्मात् को नाम कृत्यां विना मरिष्यमाणं ज्ञात्वापि निजसुतं सन्तोषयुक्तो भवेत् ॥"

इत्यभिधाय पवमानघूर्णितकदलीव निपत्य सुचिरं विललाप ॥ सोऽप्येवमचिन्तयत् "यदभिहितमनया तत्तथैव ॥ अत एव पठन्ति पौराणिकाः 'माता गुरुतरा भूमेरिति', मन्निमित्तमनयोः शोको माभूदि"ति । अथ बभाणायमबालसत्वो बालः ॥

मा भैषीर्देवि मातर्मम मरणमिदं लक्षयित्वा महेशे
श्रीमन्मृत्युञ्जयेऽस्मिन् निरवधिकरुणासागरे चन्द्रचूडे ।
संसारध्वान्तसूर्ये जयति परशिवे देहचिन्ता च केयम्
मृत्योर्नाशं करिष्येऽत्रभयति वचनं सत्यमेतत्त्रिसत्यम् ॥
॥ ७ ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एतदाकर्ण्य कर्णयुगलसुधावर्षि ब्रह्मर्षिपत्नी मनीषितसाधनाय गच्छेत्यादिदेश । सोऽप्यागत्य पितुः समीपं लब्ध्वा च त्रैयम्बकं मनुं त्रिपुरहराराधनाय कृतनिश्चयो निश्चक्राम बहिराश्रमात् ॥

ततश्चाविदूर एव ददर्श कञ्चित्पर्वतं, यः किल कैलास इव नीलकण्ठविलासास्पदं त्रिलोचन इव मस्तकधृतगङ्गः फणिफणामणिभूषितश्च कृष्ण इव प्रद्युम्नजनकः नलकूबर इव रम्भापरिवेष्टितः क्षीरार्णव इवामृतप्राप्तिहेतुः राम इव विश्वामित्रोचितकार्यकरणक्षमः भारतमिवाधिकोद्योतितगाङ्गेयोन्नतिः विविधमृगखुरक्षुण्णपद्मरागशिलातलोद्गीर्णपरागसान्द्रीकृततया वियोगिनो दण्डयितुमिव सञ्जातक्रोधः जलक्रीडाप्रसक्तवन्यगजबृंहितप्रतिबुद्धकुपितमन्दिरायितकन्दरीमध्यगतकण्ठीरवगर्जनाकुलिततया पाठयन्निव साहङ्कारं मदनतत्वोद्भासकानि शास्त्राणि तरुणपुरुषेभ्यः दीपिकाभिरिव दिव्यौषधीभिः नन्दनस्थैः सह योद्धुमिव दिवमाक्रामद्भिः कल्पवृक्षैः अन्तःपरिमृदितपरिम्लानकुसुमशयनतया सुराङ्गनासुरतपिशुनतामाचरद्भिरिव लतामण्टपैः अत्युन्नततया त्रैविक्रमपादाक्रमणस्पर्द्धयेव स्वयमपि व्योमाक्रमितुमुन्नमद्भिरिव पादपैः अभिमण्डितः पार्श्वतः पतदच्छनिर्झरतया मुक्तादामवेष्टित इव स्वर्ग इव बुधजनस्थानं आस्थानं निखिलसम्पदां अनास्थानं विपदां शरणमखिलतापसानां अप्रमेयगुणविभवः भवानीपतिविलासभूः भूधरवरिष्ठो हिमवान्नाम यत्र च पुष्परागप्रभापुञ्जस्य जागरूकत्वात् सततभास्करभावेन रात्रावपि प्राप्नुवन्ति कोकमिथुनान्यानन्दम् ॥

गायन्ति वाद्यानि च वादयन्ति
देवाङ्गना यत्र शिलातलानि ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अध्यास्य कान्तैः परमात्मनोऽपि
कुर्वन्ति धिक्कारममूः सुखस्य ॥ ॥ ८ ॥

नृत्यन्मयूरमभितः परिवीक्ष्य कान्त-
मेषा स्वकैश्च परिवीजति पक्षदातैः ।
नृत्तं समाप्य मदनेन च वञ्चितोऽयं
धावत्यसौ तदनु यत्र शिलातलेषु ॥ ॥ ९ ॥

हंसाश्च यत्र सिकतासु नदीभवासु
क्रीडन्त्यमी मदकलं मधुरं ब्रुवद्भिः ।
कण्डूयमाननिजपक्षतयश्च चञ्च्वा
दारैस्स्वकैर्हि सुरतेच्छुभिरादरात्ते ॥ १० ॥

तदनु तस्य प्रदेशे चम्पकचाम्पेयमालतीमाधवीमल्लिकाऽशोक तिन्दुक कपित्थाश्वत्थ, तिलकनक्तमालसालतालतमालहिंताल, बकुल, सरलधवलमाकन्द कुन्द कदम्ब कर्णिकार काश्मीर कदली सर्जार्जुन-जम्बुजम्बीरनिम्ब, नारिकेल नारिङ्गमातुलिङ्गतिन्त्रिण्यामलकादिनाना-विटपिभिरावृतं सन्ततप्रवहदतिशयमकरन्दनिर्झरसुहितमधुकरझङ्कार-पूरिततया त्रासयदिव वियोगिनीहृदयानि, मृगदृशो गमनं शीलयतेव मन्दमन्दं प्रवहता गन्धवहेन नृतममानैः (नृत्यद्भिः) कोमललता-पल्लवैः निवारयदिव मानं मानिनीजनस्य, पातालमिव पुन्नागाधारं कैलासशिखरमिव सोमास्पदं, सत्यलोक इव भारत्यास्थानं, चतुर्मुख-कमलाधारतां प्रपन्नं दैवतमिव वनानां आदेश इव नन्दनस्य प्रति-निधिरिव चैत्ररथस्य आयुधशालेव मन्मथस्य सर्वर्तुविलासाधिकरणं उद्यानमालुलुके मुनिवरेण ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वसन्तुं समागता यत्र दृष्ट्वा तद्रामणीयकम् ।
विराजन्ते च पुष्पाणि मल्लीनां तारका इव ॥ ११ ॥

मानं मा कुरु मानिनीजन सदा कान्तैः सह स्थीयतां
नोचेन्मन्मथशस्त्रदारितहृदा भाव्यं त्वया केवलम् ।
इत्यालापमिषाद्वदन्ति सहकारस्योपरि स्थायिनो
यत्नैते ननु कोकिलामधुरतामुद्गीरयन्तो वने ॥ १२ ॥

जित्वा जगत्नयं पश्चान्मदनेन निवेशितः ।
राजते केतकीपुष्पं यत्र कर्णे शरो वने ॥ ॥ १३ ॥
स्थापिता विजयादूर्ध्वं जगतो मदनस्य हि ।
तूणयः प्रविशान्तीव तिलपुष्पाणि यत्र नु ॥ ॥ १४ ॥

तन्मध्ये च नभस्तलमिव राजहंसमण्डितं विष्णुमिव चक्रोपशोभितं दुग्धाम्बुनिधिमिव कमलालयं मदनमिव शम्बरनियामनदक्षं नैर्मल्यातिशयादन्तः प्रतिफलितप्रपानीयप्राशनागतमृगतयातपस्तप्तुमागतमिवैन्दवबिम्बं अन्तः परिखेलदमलमत्स्यकूर्माद्यात्मतया द्वितीयमिव वैकुण्ठं हसदिव च फेनौवेन आलिङ्गदिव तरङ्गैः वेलावधूः तटसमीपस्थितप्रफुल्लकादम्बपुष्पोद्गीर्णपरागधूसरीकृतदिगन्तं एकतश्च पूजनोद्युक्तमुनिगणगृह्यमाणकुसुमतटवृक्षं एकतश्च उपर्युपरि भ्रमद्भ्रमर झङ्कारेणानुमीयमानवन्यकरियूथपतिमज्जनं पुण्डरीकाश्रयमप्यानन्दहेतु कुवलयाधारमपि त्रिभुवनविख्यातं आदर्शमिव वनदेवतायाः निर्माणकौशलमिव विश्वकर्मणः प्रसन्नमिव सत्पुरुषचित्तं अपरमिवमानससरः सरोवरमद्राक्षीत् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दृष्ट्वा च मनसि "अहो गाम्भीर्यं सरसः, अहो प्रसन्नता पयसः, अहो सौरभ्यं कमलानां, अत एव विहायातसीपुष्पसच्छायां विष्णुवक्षस्थलीं पद्मालया वासमेतेषु कुरुते ॥ नूनमिदं सरो न जानाति नारायणः, तत एनं विहाय कालकूटकलुषितपयसि दुग्धाम्बुनिधौ शेते ॥ मन्ये चास्य विरचनेनैव धातुः करे चातुर्यं व्यक्तीभवतीति । सर्वथा च समर्थः शम्भुः येन खलु अमुष्य समीप एव सकुटुम्बेन सगणेन वासो रोचितः" ।

एवमादि चिन्तयन् अमृतमिव गतायुः सद्गुरुमिवाऽधिपीडितः दिव्यौषधिमिव व्याधिग्रस्ततनुः निधिमिव निर्धनः कामुकीमिव कामुकः मिष्टान्नमिव क्षुधितः लब्ध्वा स मुनिराननन्द ॥

तदनु परेद्युः कृतस्नानादिकृत्यः भूतिभूषितसर्वगात्रः रुद्राक्षधारणादतिपवित्रः विमलचरित्रः जप्त्वा च वेदमातरं विसृस्य चाज्ञाननिर्माल्यं, कारयित्वा दिव्यनादं उपविश्य चिदाकाशे, अभिषिच्य दिव्यामृतैः, अनुलिप्य शीतचन्दनेन, अभ्यर्च्य परं शिवं चित्तवृत्तिनिरोधेन बिल्वपत्रेण, आराध्य विकसितसहस्रदलकमलसुगन्धमयेन धूपेन, प्रकाश्य ज्ञानरूपेण दीपेन, निवेद्य सर्वोत्तरमानन्दं, समाप्य पूजाविधिं तयैव पूजया सकलेष्वप्यभीष्टेषु पूर्णेषु भवत्सु सत्सु मृत्युविनाशकमृण्मयलिङ्गार्चनप्रतिपादिकां श्रुतिमप्यनुल्लङ्घयन् स्वरं निष्कामोऽपि मातुरभीष्टपूरणाय सकामः मृण्मयलिङ्गं विधाय शिवस्याराधनं, इत्थं चकार स्तुतिं बालः ॥

भवता भवतापहारिणा

मयि भाव्यं शिव तत्वतो हितम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

परथा चिरमार्जितं यश-

स्तव रुद्रेति न नश्यतीश किम् ॥ ॥ १५ ॥

तव शङ्कर किं कृतं मया

मयि कस्मान्मृड निष्ठुरो भवान् ।

अपराधि यदीश ते तदा

शिवनाम क्व गतं वदाऽऽशुभोः ॥ ॥ १६ ॥

धनदेन सखित्वमस्ति ते

शिव किं वा वद कीर्तिरार्जिता ।

मयि निर्धनिकेऽस्तु तत्ततः

कियती वा भविता न सा विभो ॥ ॥ १७ ॥

कल्याणाचलकार्मुकाय भवते कल्याणदाय प्रभो-

कल्याणीपतये नमोऽस्तु सततं कल्याणवेषाय ते ।

कल्यायाघवतामघापहरणे कल्पाय तुभ्यं नमः

सङ्कल्पादिविहीनचित्तजनताक्लृप्ताय शम्भो नमः ॥

॥ १८ ॥

एवं प्रतिदिनं कुर्वतस्तस्य कतिचिद्दिनानि व्यतीयुः ।

तदन्येद्युः वियोगिनोजनहृदयान्तर्वर्तमानविरहानलदह्यमानविवर्णीकृतस्थूलतमवक्षोजहारघटितमुक्ताफलेष्विव मदनमदोन्मत्तमत्तकाशिनीद्वितीयसुरतसमयमृदितशय्याभावप्रपन्नमल्लिकाकुसुमेष्विव ग्लानिं व्रजत्सु तारागणेषु शयनगृहान्नायकनिर्गमनमाशङ्क्य कदान्तमेष्यति दिवसः कदा च भविष्यति रात्रिः पुनरस्यागमनमिति चिन्ताकलुषित-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चित्तेषु तरुणीजनेष्विव विवर्णतां भजत्सु दीपेषु द्वेष्टाऽयमस्माकमिति मुहुर्मुहुरनुचिन्त्य निशिचरतिमिरसमुदायैराच्छादित इव अखिलकुलटाजनमनोविदारणनिपुणकिरणसम्पादितपातकं परिहर्तुकामे स्वकीयसुहृदः सम्भावयितुं प्रविष्ट इव पाथोधिं दुर्मित्र इव मित्रोदयामसहमाने दुर्जन इव दोषाकरे पातकिनीव कलङ्काकुलितहृदये नरपतिदुर्मन्त्र इव विगलितकरव्यापारनियन्त्रित इव भ्रष्टश्रीके अस्तं भजति शीतभानौ उदधिज्वलदबिन्धनज्वालाकलाप इव उदयगिरिवरपद्मरागमणिशिखरोद्गीर्णतरलप्रभापुञ्ज इव दिगङ्गनाकुचकलशविस्तारितकुङ्कुमपत्ररेखासमुदाय इव आकाशमावृण्वति सन्ध्यारागे माणिक्यमयताटङ्कमिवान्तरिक्षदेवतायाः कुङ्कुमबिन्दुरिव दिगङ्गनायाःशृङ्गार इव पद्मिन्यानन्दजनकः इन्द्रजिदिव कौशिककठोरगर्जनाप्रतिपक्षतां वर्तमानः कृष्ण इव चक्रसंयोगकरकरः राम इव करप्रतापोद्योतिताखिललोकः स्वकार्यानुरूपतत्तदुद्योगेषु नियोजयन् जनान् स्वस्य श्रेष्ठतां सूचयितुमिव पादैरेव पवित्रयन् भुवनानि चक्रवर्तीव नृपतिभ्य उदकेभ्यः करमिव द्रवत्वमाददानः भीषयन्निव पिशाचततेः भूषयन्निव गगनमण्डलं अज्ञानस्येव तमसः बोध इव नाशं कुर्वन् भगवान् दिनमणिरुदजृम्भत । तदनु चिरादागताय मित्राय तत्सम्भावनायेव सञ्चितमामोदमुपहारं दातुकामानीव विकसितानि पद्मषण्डानि ।।

अथ च समयातिपातमाशङ्क्य पूर्वमेव प्रस्थापितैः तदीयदिव्यतेजसाऽप्रतिहतसामर्थ्यैः पुनरागत्य शृण्वत्सु अपस्मारादिसेनानायकेषु-समुपस्थिते चित्रगुप्ते सन्निधावेवापमृत्युमन्त्रिणः विज्ञापितोऽभूद्धर्मराजः ।।

> मृत्युत्वं तव धर्मराज भगवन् लोके प्रसिद्धं च यत् ।
> सामर्थ्यं किल भीषणत्वमधिकारस्ते च यः प्राणिहन् ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दत्तो दैवतदैवतेन गिरिजाकान्तेन तुष्टेन भोः
तत्सर्वं गतमित्यवेहि यदि तद्द्रोहस्त्वया चिन्त्यते ।। १९ ।।

इति तदीयकर्णपरुषं भाषणमाकर्ण्य जम्बूकगर्जनेन पञ्चानन इव पदा ताडितः पवनाशन इव द्विगुणीकृतरोषणो लोकभीषणः अधिकतया अन्तर्व्याप्य बहिरपि निर्गतः क्रोधाग्नेः धूमसमुदायमिवोष्णश्वासमुत्सृजन् घर्षयित्वा च दन्तैरेव दन्तान् प्रस्फुरितदन्तच्छदः कोपावेगद्विगुणितशोणिम्ना उत्सृजन्तीवाग्निकणान् भ्रमत्तारके चक्षुषी कुर्वाणः उत्थाय धर्मासनात् गत्वा च शस्त्रशालां पुत्रसन्दर्शनायागतेन भास्करेणेव जाज्वल्यमानेन मुकुटेनालङ्कृत्य मस्तकं आमुच्य वारबाणं आबध्य कटितटे खड्गलतां आदाय कालायसमयं कालदण्डं पाशं च उन्नततया प्राणरक्षणार्थमागतमञ्जनाचलमिव महामहिषमारुह्य तदिङ्गितज्ञेन हस्ताङ्गुलीविलसदमलतरतरवारिशैवालमञ्जरीभिः दानोदकलुब्धगण्डस्थलपतद्भ्रमरनिरासचलितकर्णतालहस्तिशिखरिभिः अनेककोटिभिर्सिंहनादगम्भीरध्वनिभिः वैयाघ्रचर्मपरिष्कृतरथद्वीपैः सर्वदापि रणाङ्कणसम्मुखीभवत्पदातिहेलाभिः सुवर्णमयवर्मभूषणखचितहीराद्यनेकदिव्यरत्नैः समरधीरमहावीरकरतलदेदीप्यमानभिण्डिवालमुसलमुद्गरमुसुण्ठीगदाचक्रपरिघतोमरशतघ्नी वज्राद्यायुधभीषणयादोभिश्च परिपूर्णं अक्षोभ्यं सेनार्णवं जङ्घावेगविजितमनोजवतुरगखुरक्षुण्णभूतलप्रोद्भूतपरागसान्द्रीकृतगगनमण्डलं आकर्षता मन्त्रिणाऽपमृत्युना द्वारदेशस्थितेन चित्रेण च समागम्य आदिश्य च रक्षणाय सेनामुखे अपस्मारं तत्पार्श्वयोः क्षयातिसारौ पृष्ठतः पाण्डुकुष्ठमहोदरान् उभयपार्श्वतश्च मूलज्वरौ गुल्मे च शूलगुल्मौ अङ्गप्रत्यङ्गेषु इतरसेनापतीन् स्वस्याग्रतो विधाय श्वानौ

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शामशवलौ चित्रापमृत्युभ्यामलङ्कृतपार्श्वभागः पुरोभवद्वायुभ्रपतनादि-दुर्निमित्तेऽप्यशङ्कमानः अखिललोकभीषणवन्दिभणितबिरुदावली-श्रवणानन्दभरितः

गृह्णीध्वं नहि मुञ्चताशु कुरुत क्षिप्र शरीरस्य भोः
विच्छेदं तिलशोऽस्य शीघ्रमभितोऽमुं ताडयन्तु द्रुतम् ।
प्राणान् संहरताद्य पश्यत च किं नोपेक्षणीयो जनो
राजाज्ञा विपरीतकृच्च नितरां तस्मादयं शिक्ष्यताम् ॥
॥ २० ॥

एवमादिवचनानि शृण्वन् भटानां जङ्गम इव अञ्जनाचलः, मूर्तिमानिव अन्धकारः शलभ इव पावकमाजगाम कालस्तत्स्थलम् ।

तद्दूरत एव

छिन्नास्ते कतिचित्करोरुकटिसन्धौ चापि भग्नाः परे
केषां चिद्धृदयं विदीर्णमभवत् सामर्थ्यमप्राकृतम् ।
दृष्ट्वा तं मुनिपुङ्गवं परशिवस्याराधनं केवलं
कुर्वन्तं च तदीयदिव्यमहसा सम्प्लोषिताः सैनिकाः ॥
॥ २१ ॥

ततस्ते समालोक्य स्वां स्वामवस्थां आमन्त्र्य परस्परं लज्जा-वनम्रमुखाः पलायनोन्मुखाः उत्सृज्य स्वागिनमेकाकिनं अपमृत्युना चित्रेण च साकं यथागतं जग्मुः ।

अथ च विरिञ्चेः प्रथमसर्गनिरन्तरास्वादनसुहिततया तदितर-सृष्टिमास्वादितुं प्राप्तया सन्ततज्वलदविन्धनज्वालयेव रसनया लेलि-ह्यानमिव त्रिभुवनं करालवदनान्तःपरिदृश्यमानकुटिलनिर्मलदंष्ट्रतया

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वैरस्मरणानुवृत्त्या च चन्द्रखण्डमभितो वेष्टयन्तमिव तिमिरसमुदायं न केवलं मम कठोरः पराक्रमो वाहनीभूतस्याप्येतादृशो विक्रम इति सूचयितुमिव महिषक्रमणेनैव दारयन्तमवनीतलं अतिभयङ्करकुटिलदर्शनेन व्यापादयन्तं कृत्स्नसत्वानि आस्फोटयन्तं प्रतिक्षणं नीचं प्राप्ताधिपत्यमिव क्षणमपि सोढुमशक्यं दुर्जनवचनमिव सर्वदापि मनोव्यथाकारकं विषयसेवनमिव परिणतिविषयम् ॥

कस्त्राता तव विद्यतेऽर्भक वद त्वद्देहतोऽसूनिमान्,
पाशेनैव ग्रहीष्यतो मम पुरः स्थातुं च कः शक्तिमान् ।
रे रे मत्तगजेन्द्रकुम्भदलनाद्रक्ता नखा यस्य वै
सिंह्यस्याग्रत एव तस्य चपलः फेरुः कथं स्थास्यति ॥
॥ २२ ॥

इति भाषमाणं पदे पदे भीषयन्तमनुक्षणं आपतन्तमग्रत एव, दृष्ट्वा चान्तकं विगलितधैर्यः धार्यमाणहृदयातङ्कः अन्तकान्तकं स्मरन्नेव मनसि रक्षरक्षेति वदन्नालिलिङ्ग पारमेश्वरं लिङ्गम् ॥

ततः आगत्य समीपं पारङ्गतोऽपि श्रुतीनां, स्थितोऽपि धर्माधर्मविवेचनकृताधिपत्ये, जानन्नपि विचित्रशक्ति शिवस्य, जानन्नपि माहात्म्यम् शिवभक्तानां, जानन्नपि फलं शिवाराधनस्य "क्षुपा"ख्यस्य राज्ञः पक्षपातं दधानस्य शिवभक्तेन कृतं, जानन्नपि विष्णोः पराभवं जानन्नपि वीरभद्रविरचितां शिवावमानात् दक्षयज्ञनाशप्रक्रियां जानन्नपि शिवद्रोहिणामधोगतिं विद्वानपि सकलशास्त्रेषु आस्तम्बादा च ब्रह्मणः प्रभवन्त्या भवितव्यतया विफलीकृतविवेकवैभवः शिशुरिवात्मनाशाय कण्ठं काल-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भुजङ्गेन निङ्कुपारयोः पाशेन वेष्टयित्वा यावद् आकर्षत्यन्तकः तावदेव तेजस्तदन्तकान्तकं अग्रत एव प्रादुरभूत् लिङ्गाच्छित्वा च पाशम् ॥

तत्र च ललाटस्थितनावकधूमलतासमुदायेनेव पिङ्गलेन मध्यभागविलसदमलजलप्रवाहेण जटामण्डलेन कपर्दबन्धं भूषयता चन्द्रखण्डेन च अभिमण्डितं "अखिलभुवनविनाशो माभूदि"ति कारुण्यादिव निमीलितेन ललाटपट्टशोभिन्याःधवलविभूति - त्रिपुण्ड्र-मालिकायाः मध्यभागग्रथितपद्मरागमणिनेव तृतीयलोचनेन नाशयन्तं स्वभक्ताज्ञानतिमिरं अपारं कृपारसं वहता लोचनयुगलेन रक्षयन्त-मखिलब्रह्माण्डानि स्वभावसुन्दरगण्डमण्डलप्रसृमरकान्तिफणिराज-कुण्डलयुगेन दन्तचन्द्रचन्द्रिकासमूहेनेव मन्दस्मितेन च आनन्दयन्तं मनांसि पश्यतां, दक्षिणेन पाणिना स्वाश्रितानामहंभावस्याभावाय गृहीतत्रिशूलं, वेदमयेन मृगेण भूषितेतरकरपल्लवं, जननमरणक्लेशनाश-नकरे जयत्यभयकरे साररहितविषयभोगवदान्येन किं भयेति लज्जयेव अवाङ्मुखेन वरदेन करारविन्देन पूरयन्तं अभीप्सितं कटितटवेष्टित-दिव्याम्बरं निर्जितानि कमलानि इति सूचयितुमिव पद्मरेखामधः-कुर्वता नम्रजनचित्तमतङ्गजं नियन्तुमिव रेखाङ्कुशं धारयता मञ्जीर-भूतकुण्डलीशफणारुणप्रभापुञ्जद्योतितदिगन्तेन पादेन भूषयन्तं श्रुति-सीमन्तिनीसीमन्तं वेगातिरेकात् किमपि क्षुब्धक्रुद्धभूषणायमानफणी-श्वरफूत्कारेण प्रतिश्रुतमृत्युवधेनेव अपरेणपादेन मारयन्तं मृत्युं अवधिं दुःखानां शेवधिं सुखानां अत्यद्भुतमुत्पश्यतां आश्चर्यमाश्चर्याणां आनन्द-मन्तःकरणस्य, परिपाकं यज्ञाधिकानां फलमखिलतपसां पावनं पाव-नानां आधारं सर्वभूतानां अनाधारं साक्षाच्चकार पार्वतीरमणं परमे-श्वरं मार्कण्डेयो मुनिः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ततः पार्श्वत एव ॥

मृतं मृत्युं बालः प्रपतितमधस्तान्महिषतो
मुखं विस्तार्यातिभ्रुकुटिकुटिलं भीषणतरम् ।
विलोक्य प्रारेभे स्तवनमथ कर्तुं मुनिवरः
स भक्तेरुत्कर्षात् परवशमना गद्गदवचाः ॥ २३ ॥

जय त्वं देवेश त्रिपुरहर सर्वोत्तमतया
स्थितत्वं ते ब्रूते निगमशिरसामुक्तिनिवहः ।
तथापि त्वन्मायाकवलितमनाः पातकिजनो
न जानात्येव त्वां परशिव च निन्दां प्रकुरुते ॥ २४ ॥

त्वयीशे भूतानां जयति भगवन् भोक्तरि सति
प्रभो सर्वेषां कर्तरि च सुखदुःखेऽनुभवति ।
वृथाऽहन्तां बिभ्रज्जन इह विचारं न कुरुतेऽ-
प्यहंशब्दस्यार्थः क इति शिव भो ! वच्मि किमहो ॥
॥ २५ ॥

कर्तृत्वं जयति त्वयीश भगवन् सर्वस्य शम्भो विभो,
तस्मात्सर्वमगेन्द्रजासहचर स्वामिन्श्च सम्भाव्यते
जीवो वास्त्वहमप्यसानि जननं मृत्यादिकं चास्तु भो
का हानिः शिव तावतेति विदितं त्वत्सेवया शङ्कर ॥
॥ २६ ॥

वाणीभावितवैभव, वाणीकृतलक्ष्मीधव ऊरीकृतदिव्यरूप दूरीकृतभक्तताप न्यक्कृतमुनिकुलशाप धिक्कृतदितिसुतदर्प मारित–

CC-0. Sārasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्रिपुरासुर नाशितत्रिजगत्पामर दारितनरसिंहविग्रह धारित-सुन्दरदेह विभूतिभूषितदिव्यशरीर विभूषणीकृतफणीश्वर हालास्य-पुरावासोत्कण्ठ हालाहलशोभितकण्ठ कल्याणाचलधनुर्धर कल्याणगुण-रत्नाकर कुन्दाभरदन मन्दारभूषण मन्दरगिरिवरदिव्यसदन सुन्दरतर-मन्दहसन मकुटायमानशीतकर कटकायमानकाकोदर चतुष्षष्टिलीला-विनोदकर चतुर्मुखगृहीतसारथ्यधिकार भामापतितुष्टान्तरङ्ग रामा-लङ्कृतवामभाग अखिलभुवनैकवन्द्य निखिलनिगमशिरोवेद्य, सर्वोत्तमत्व-पदाधिकरण गर्वोत्कृष्टमदनदहन वन्दारुजनपूजितचरणारविन्द कन्दाशनगणस्तुतिसञ्जातानन्द विष्ण्वादिकविबुधसंसेवित कृष्णादि-मुनिगरिष्ठाभिवन्दित जय जय श्रीशिव नमस्ते नमस्ते ॥

त्रातास्माकं त्वं गुरुस्त्वं च बन्धुः
माता च त्वं त्वं च तातो धनं च ।
विद्या च त्वं त्वं च सर्वं महेश
स्वामिन् शम्भो देवदेव प्रसीद ॥ ॥ २७ ॥

स्तुत्वैवमादिभिरपि श्रुतिभिः पुराणै
स्तन्त्रैश्च साम्बमनघं परमेश्वरं तम् ।
भक्त्या मुनिर्नततनुर्मनसा च वाचा
कायेन चापि नमनं शतशश्चकार ॥ ॥ २८ ॥

ततश्च किं करोति किमाज्ञापयतीति जाग्रत्स्वनुचरेषु नन्दि-मुखेषु गणेषु, पूर्वमेवागत्य स्थिते शिरसि बद्धाञ्जलिपुटे कमलाकान्ते नीरूपपरमेश्वरसन्दर्शनकुतूहलेन सकुटुम्बमागत्य दूरतः स्थितेषु विविधविद्याविशारदविबुधगन्धर्वाप्सरःकिन्नरविद्याधरेषु वर्षत्सु पुष्पवर्ष-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

बलाहकेषु गायत्सु गन्धर्वेषु वादयन्तीषु वीणाः किन्नरीषु जय विजयीभव ओं हर हर ओं इति तारस्वरेण स्तुवत्सु परमर्षिषु प्रहसन् पार्वतीरमणः दुन्दुभिध्वनिगम्भीरया गिरा मुनिकुमारमिदमूचे ॥

मा भैषीर्वत्स विप्रेन्द्र मृतं मृत्युं च पश्य भोः ।
यं यमिच्छसि मत्तस्त्वं तं तं वृणु वरं मुने ॥ ॥ २९ ॥

आकर्ण्य च सुधारूपां तां वाचं परमेशितुः ।
बालो बभाषे देवेशमन्तकान्तकमव्ययम् ॥ ॥ ३० ॥

सुदृढां शिवभक्तिं त्वं मह्यं दिश कृपानिधे ।
मय्यस्तु करुणा शम्भो तव सर्वोत्तमाव्यय ॥ ॥ ३१ ॥

अपि च ॥

मृडाऽस्तु मम मानसं त्वयि सदैव पूजाकरौ
करावपि च लोचने शुभदमूर्तिसन्दर्शने ।
प्रदक्षिणविधौ पदे श्रुतिरियं कथाकर्णने
महेश रसना परं शिव तव प्रभो नामनि ॥ ३२ ॥
इति ।

ततः ॥

बभाषे श्रीमहादेवो मुनीन्द्रं परमेश्वरः ।
भक्त्या स्तुत्या च तुष्टोऽस्मि प्रार्थितं यत्तदस्त्विति ॥ ३३ ॥

अथ च भगवान् कमलाकान्तः पार्वतीकान्तमित्थमस्तावीत् ।

जय जय भगवन् महेश शम्भो
परशिव करुणां कुरुष्व दीने ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अखिलभुवनपालनैकदक्ष
  त्रिपुरहर सदा प्रसीद देव ॥ ॥ ३४ ॥

व्यापादितश्चायं कीनाशस्त्वदवज्ञाफलं प्राप्तं द्वेषेण वाऽवज्ञया वाप्यभक्त्या वास्तु, कथमपि त्वद्दर्शनं जातमस्य । तस्मान्मुक्तः समस्तादपि पातकात् त्वयैवाभिषेचितश्च प्राणिसंयमनाधिकारे, तत एव यथा जीवेदयं यमः, क्वचित्कालान्तरे मार्कण्डेयोऽपि यथा च विदेहकैवल्यं लभेत तथा कुर्विति विज्ञापनां कुर्वति भगवति श्वेतद्वीपवासिनि नारायणे, सुधासारवाहिना कृपाकटाक्षेण सञ्जीवयामास धर्मराजं भगवान् करुणाकरः शङ्करः ।

ततः स्वप्नोत्थित, इव सचेतनः शमनोऽप्यालोक्य पुरतः पिनाकपाणिं भगवन्तमम्बिकारमणं यथामति स्तोतुमारभत ॥

तातस्तारकशत्रोः
  स्वयमपि जीवस्य तारको जयतात् ।
पञ्चाननोऽपि सततं
  कुञ्जरवदनस्य सौख्यकृद्देवः ॥ ॥ ३५ ॥

अपि च ॥

क्षमस्व ममापराधान्
  ज्ञानादज्ञानतः कृतान् त्वयि भोः ।
शरणं त्वमेव शम्भो
  भूमौ स्खलितस्य भूमिरवलम्बः ॥ ॥ ३६ ॥

इति स्तुत्वा प्रणमन्तं अनुशशास देवदेवः ॥

मद्भक्ता वशगाः कदापि न च ते, पूज्याश्च ते सर्वदा
  तेषां पातकमस्तु वाऽथ सुकृतं शास्ता च दातास्म्यहम् ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

क्षान्तं भो ह्यपराधजातमपि तत्सर्वं यमाशु त्वया
गत्वा संयमिनीं च पाल्यमखिलं धर्मे च कृत्वा मतिम् ॥
इति । ॥ ३७ ॥

ततश्च, भो मार्कण्डेय, त्वमपि गच्छाश्रमपदं यदा च मां स्मरसि तदाविर्भवामि, षोडशकल्पमायुश्च ते दत्तमित्युक्त्वा गणेन्द्रैः साकमन्तर्दधे भगवान् परमेश्वरः ।

ध्यायन्तः शिवमव्ययं हृदि ततस्ते चिन्तयन्तो मुने-
र्भक्तिं तेन कृतां गतिं च मुनिना मृत्योः स्मरन्तः सुराः ।
विष्ण्वाद्याः पथि दानवाश्च सकलास्ता भाषमाणः कथाः
स्वं स्वं लोकमथो ययुर्मुनिवरा गन्धर्वविद्याधराः ॥
॥ ३८ ॥

ततश्च बालकोऽपि प्रणम्य तत्र आगतान् आज्ञापितस्तैर्हिमवता च स्तूयमानश्चारशैर्विचित्रशक्तितां दयावत्वं च चिन्तयन् शिवस्य, क्वचित्पत्रीकृतैः ऊर्ध्वशाखास्थिततया अव्यक्तमधुरं ब्रुवत्तया च प्रत्युद्गम्य अम्बरचरसिद्धसुरर्षीन् आतिथ्याय आह्वयद्भिरिव शुकैः सनाथीकृतैः प्रफुल्लपुष्पशोणिम्ना रञ्जयद्भिरिव तत्प्रदेशं शाल्मलीवृक्षैरुपेतभूमिभागाभिः क्वचिदभिवृद्धशाद्वलतया श्यामायमानाभिः क्वचिन्मृगकुलाभ्यस्यमानरोमन्थसमये निपतितफेनपुञ्जप्रभापाण्डराभिः क्वचित्कनककेतकीपुष्पच्छायाभिः कनकायमानाभिः क्वचिदेलावनगन्धगन्धिताभिः क्वचित्कपिकुलनादमेदुराभिः वनस्थलीभिरुपशोभितसमीपदेशं—

मुक्तावल्येव भूमेः पङ्क्त्येव तपसां निखिलभुवनपरिभ्रमणखेदात् विश्रान्त्यर्थमागत्य स्थितया कीर्त्येव मुनेः आर्जितपुण्यपरम्परयेव

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तत्रत्यानां पदव्येव सायुज्यपदमुच्चतरमारुरुक्षतोऽस्य पातकिजन-निरस्तदुष्कृतमलिनमात्मानं पवित्रीकर्तुं तपस्विसन्दर्शनार्थमागतयेव गङ्गया अलङ्कृतं, धर्मपताकाभिरिव शापभयादेव मन्दमन्दं वहता गन्धवहेन दोधूयमानाभिः वल्कलपरम्पराभिरभिमण्डितानां अभ्रस्ता-दाश्रमतरूणां चिरतरसहवासाद्विस्रम्भितैराश्रममृगैः सह मुनिबालकै-रारभ्यमाणपांसुक्रीडं दिशि दिशि विन्यस्तनीवारकुसुमबलि, क्वचि-त्क्रियमाणवेदपारायणं, क्वचिदापठ्यमानशास्त्रं, क्वचिदाभाष्यमाण-धर्मशास्त्रं, क्वचिदागृह्यमाणशिवगीतातात्पर्यं, क्वचिदभ्यस्यमानयोगं, क्वचिच्छिवलिङ्गपूजनतत्परतपोधनजनं, क्वचिदुच्यमानपुराणं क्वचि-त्संशोध्यमानयज्ञकाण्डं, महात्मनः स्वपितुर्मृकण्डोराश्रममाजगाम यस्मिन् खलु परस्परविरुद्धसत्वान्यपि शान्तिमन्ति,

तथाहिः—

नृत्यतां कलापिनां आतपत्रायमाणपिञ्छच्छायां आश्रयन्ते फणिनः ।। कलभोऽपि चिरसंत्रासादेव निःशङ्कः सटासु गृहीत्वा केसरिणमाकर्षति ।। सोऽपि तेन साकं चरीकर्ति विहारम् । गोतर्णका अपि मातृनिर्विशेषं दृश्यमानाः तत्पोतकैः सह व्याघ्र्याः क्षीरपानं कुर्वते ।। तादृशमागत्य सुहृद्गणपरिवृताय शिष्यजनैरुपसेव्य-मानाय निरन्तरशिवध्यानक्षपितकल्मषाय पित्रे मात्रे च निवेद्य वृत्तान्तमखिलं ताभ्यां च सानन्दमुपाघ्रातो मूर्ध्नि आलिङ्गितश्च उद्वुह्य कुलजां कन्यां उत्पाद्य च पुत्रानात्मसदृशान् तस्यामेव सर्व-कालमप्यनुभवन् शिवानन्दं मार्कण्डेयो भगवान् विजयते ।।

इति श्रीविरूपाक्षविरचिते शिवविलासाख्ये चम्पूकाव्ये

चतुर्थोल्लासः ।।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvatī Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(SARASVATI MAHAL LIBRARY PRESS, THANJAVUR.)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy